# Tulasimahatmya Stotram

# તુલસીમાહાત્મ્યસ્તોત્રમ્

## Document Information

Text title : Tulasimahatmya Stotram

File name : tulasImAhAtmyastotram.itx

Category : devii, devI, skandapurANa, mAhAtmya, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 249/1-19||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2025

*sanskritdocuments.org*

Tulasimahatmya Stotram

# તુલસીમાહાત્મ્યસ્તોત્રમ્

વાણ્યુવાચ ।
તુલસી રોપિતા યેન ગૃહસ્થેન મહાફલા ।
ગૃહે તસ્ય ન દારિદ્ર્યં જાયતે નાત્ર સંશયઃ ॥ ૧॥

તુલસ્યા દર્શનાદેવ પાપરાશિર્નિવર્તતે ।
શ્રિયેઽમૃતકણોત્પન્ના તુલસી હરિવલ્લભા ॥ ૨॥

પિબન્ત્યા રુચિરં પાનં પ્રાણિનાં પાપહારિણી ।
યસ્યા રૂપે વસેલ્લક્ષ્મીઃ સ્કન્ધે સાગરસમ્ભવા ॥ ૩॥

પત્રેષુ સતતં શ્રીશ્ચ શાખાસુ કમલા સ્વયમ્ ।
ઇન્દિરા પુષ્પગા નિત્યં ફલે ક્ષીરાબ્ધિસમ્ભવા ॥ ૪॥

તુલસી શુષ્કકાષ્ઠેષુ યા રૂપા વિશ્વવ્યાપિની ।
મજ્જાયાં પદ્મવાસા ચ ત્વચાસુ ચ હરિપ્રિયા ॥ ૫॥

સર્વરૂપા ચ સર્વેશા પરમાનન્દદાયિની ।
તુલસીપ્રાશકો મર્ત્યો યમલોકં ન ગચ્છતિ ॥ ૬॥

શિરસ્થા તુલસી યસ્ય ન યામ્યૈરનુભૂયતે ।
મુખસ્થા તુલસી યસ્ય નિર્વાણપદદાયિની ॥ ૭॥

હસ્તસ્થાતુલસીયસ્ય સ તાપત્રયવર્જિતઃ ।
તુલસી હૃદયસ્થા ચ પ્રાણિનાં સર્વકામદા ॥ ૮॥

સ્કન્ધસ્થા તુલસી યસ્ય સ પાપૈર્ન ચ લિપ્યતે ।
કણ્ઠગા તુલસી યસ્ય જીવન્મુક્તઃ સદા હિ સઃ ॥ ૯॥

તુલસીસમ્ભવં પત્રં સદા વહતિ યો નરઃ ।
મનસા ચિન્તિતાં સિદ્ધિં સમ્પ્રાપ્નોતિ ન સંશયઃ ॥ ૧૦॥

તુલસીં સર્વકાયાર્થસાધિનીં દુષ્ટવારિણીમ્ ।

યો નરઃ પ્રત્યહં સિઞ્ચેન્ન સ યાતિ યમાલયમ્ ॥ ૧૧॥

ચાતુર્માસ્યે વિશેષેણ વન્દિતાપિ વિમુક્તિદા ।
નારાયણં જલગતં જ્ઞાત્વા વૃક્ષગતં તથા ॥ ૧૨॥

પ્રાણિનાં કૃપયા લક્ષ્મીસ્તુલસીવૃક્ષમાશ્રિતા ।
ચાતુર્માસ્યે સમાયાતે તુલસી સેવિતા યદિ ॥ ૧૩॥

તેષાં પાપસહસ્રાણિ યાન્તિ નિત્યં સહસ્રધા ।
ગોવિન્દસ્મરણં નિત્યં તુલસીવનસેવનમ્ ॥ ૧૪॥

તુલસીસેચનં દુગ્ધૈશ્ચાતુર્માસ્યેઽતિદુર્લભમ્ ।
તુલસીં વર્દ્ધયેદ્યસ્તુ માનવો યદિ શ્રદ્ધયા ॥ ૧૫॥

આલવાલામ્બુદાનૈશ્ચ પાવિતં સકલં કુલમ્ ।
યથા શ્રીસ્તુલસીસંસ્થા નિત્યમેવ હિ વર્દ્ધતે ॥ ૧૬॥

તથા તથા ગૃહસ્થસ્ય કામવૃદ્ધિઃ પ્રજાયતે ।
બ્રહ્મચારી ગૃહસ્થશ્ચ વાનપ્રસ્થો યતિસ્તથા ॥ ૧૭॥

તથા પ્રકૃતયઃ સર્વાસ્તુલસીસેવને રતાઃ ।
શ્રદ્ધયા યદિ જાયન્તે ન તાસાં દુઃખદો હરિઃ ॥ ૧૮॥

એકો હરિઃ સકલવૃક્ષગતો વિભાતિ નાનારસૈસ્તુ પરિભાવિતમૂર્તિરેવ ।
વૃક્ષાધિવાસમગમત્કમલા ચ દેવી દુઃખાદિનાશનકરી સતતં સ્મૃતાઽપિ ॥ ૧૯॥

ઇતિ શ્રીસ્કન્દપુરાણે નાગરખણ્ડે સપ્તચત્વારિંશાધિકદ્વિશતતમાધ્યાયાન્તર્ગતં
તુલસીમહિમાસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । નાગરખણ્ડ । અધ્યાય ૨૪૯/૧-૧૯॥

skandapurANa . nAgarakhaNDa . adhyAya 249/1-19..

Proofread by PSA Easwaran

*Tulasimahatmya Stotram*

pdf was typeset on August 24, 2025

Please send corrections to *sanskrit@cheerful.com*